# tantrAkhyAyikA

# તંત્રાખ્યાયિકા

## Document Information

Text title : ta.ntrAkhyAyikA

File name : tantraakhyayikaa.itx

Category : misc

Location : doc_z_misc_misc

Transliterated by : Lars Martin Fosse lmfosse at online.no

Proofread by : Lars Martin Fosse lmfosse at online.no

Latest update : 13 Dec 1996, November 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# તંત્રાખ્યાયિકા

## 1, 2 : Affe und Keil

અસ્તિ કશ્ચિદ્વણિજકઃ ।
નગરસમીપે તેન દેવતાऽऽયતનં ક્રિયતે ।
તત્ર યે કર્મકારાસ્સ્થપત્યાદયઃ !
મધ્યાહ્નવેલાયાં
આહારનિમિત્તં ભોજનમણ્ડપં અનુપ્રવિષ્ટાઃ ।
અકસ્માચ્ચાનુષઙ્ગિકં દેવગૃહે વાનરયૂથં
આગતમ્ ।
અથ તત્રએકસ્ય શિલ્પિનો
અર્ધસ્ફોટિતકાષ્ઠસ્તમ્ભો
અર્જુનમયઃ ખદિરકીલકેન મધ્યે
યન્ત્રનિખાતેનાવસ્તબ્ધો
અવતિષ્ઠતે ।
તત્ર કદાચિદ્વાનરયૂથો ગિરિશિખરાદવતીર્ય
સ્વેચ્છયા
તરુશિખરપ્રાસાદશૃઙ્ગદારુનિચયેષુ પ્રક્રીડિતું
આરબ્ધઃ ।
એકસ્તુ તત્રાસન્નવિનાશશ્ચાપલાદુપવિશ્ય
સ્તમ્ભે યન્ત્રચારં
ઉદ્દિશ્યૈદં આહ ।
કેનાયં અસ્થાને કીલકો નિખાતઃ ।
ઇતિ પાણિભ્યાં એવ સઙ્ગૃહ્યૌત્પાટિતું આરબ્ધઃ ।
સ્થાનાચ્ચલિતે કીલે યદ્વૃત્તં ! તદનાખ્યેયં !
એવં એવ ભવતા

જ્ઞાતં ઇતિ ।

## 1,2 Schakal und Trommel

અસ્તિ કશ્ચિદ્ગોમાયુર્ આહારવિચ્છેદાત્
ક્ષુત્ક્ષામકણ્ઠ ઇતશ્ચ
ઇતઃ પરિભ્રમન્નુભયસૈનસ્યાયોધનભૂમિં
અપશ્યત્ ।
તત્ર ચ મહાન્તં શબ્દં અશ઼્ણોત્ ।
તદ્ભયસંક્ષુભિતહૃદયઃ કિં ઇદં ! વિનષ્ટો
અસ્મિ ! કસ્યાયં
શબ્દઃ ! ક્વ વા કીદૃશો વાએષ શબ્દ ઇતિ !
ચિન્તયતા દૃષ્ટા
ગિરિશિખરાકારા ભેરી ।
તાં ચ દૃષ્ટ્વાચિન્તયત્ ।
કિં અયં શબ્દો અસ્યાસ્સ્વાભાવિકઃ ! ઉત
પરપ્રેરિત ઇતિ ।
અથ સા યદા વાયુપ્રેરિતૈર્ વૃક્ષાગ્રૈસ્સ્પૃશ્યતે !
તદા શબ્દં કરોતિ !
અન્યદા ન ! ઇતિ તૂષ્ણીં આસ્તે ।
સ તુ તસ્યાસ્સારાસારતાં જ્ઞાતું સંનિકર્ષં
ઉપશ્લિષ્ટઃ ।
સ્વયં ચ કૌતુકાદુભયોર્ મુખયોર્ અતાડયત્ !
અચિન્તયચ્ચ।
ગમ્યં ચએતદ્ભક્સ્યં ચ મમ ।
ઇત્યવધાર્યએકદંષ્ટ્રયા ક્ષુધાવિષ્ટઃ
પાટિતવાન્ ।
પરુષત્વાચ્ચ ચર્મણઃ કથમપિ ન
દંષ્ટ્રાભઙ્ગં અવાપ્તવાન્ ।
પ્રતિબદ્ધાશ્ચ પુનર્ અપ્યચિન્તયત્ ।
નૂનં અસ્યા અન્તર્ ભક્ષ્યં ભવિષ્યતીતિ ।

ઇત્યધ્યવસ્ય ભેર્યા મુખં વિદાર્યાન્તઃ
પ્રવિષ્ટઃ ।
તસ્મિન્નપિ ન કિઞ્ચિદાસાદિતવાન્ ।
પ્રતિનિવર્તિતું અશક્તો અન્તર્લીનાર્ધકાયો
વિહસ્યાબ્રવીત્ ।
પૂર્વં એવ મયા જ્ઞાતં ઇતિ ।

## 1,3 Drei selbstverschuldete Unf„ll

અસ્તિ કસ્મિંશ્ચિત્ પ્રદેશે પરિવ્રાડ્ દેવશર્મા નામ ।
તસ્યાનેકસાધૂપપાદિતસૂક્ષ્મવાસોવિશેષૌપચય્
આન્ મહત્ય્-
અર્થમાત્રા સંવૃત્તા ।
સ ચ ન કસ્યચિદપિ વિશ્વાસં યાતિ ।
અથ કદાચિદાષાઢભૂતિર્ નામ પરવિત્તાપહૃત્
કથં ઇયં
અર્થમાત્રાસ્ય મયા પરિહર્તવ્યૈતિ
વિતર્ક્યાવલગનરૂપેણ
ઉપગમ્ય તત્કાલેન ચ વિશ્વાસં અનયત્ ।
અથ કદાચિદસૌ પરિવ્રાજકસ્-
તીર્થયાત્રાપ્રસઙ્ગે તેન
આષાઢભૂતિના સહ ગન્તું આરબ્ધઃ ।
તત્ર ચ કસ્મિંશ્ચિદ્વનોદ્દેશે નદીતીરે
માત્રાન્તિક
આષાઢભૂતિં અવસ્થાપ્યએકાન્તં
ઉદકગ્રહણાર્થં ગતઃ ।
અપશ્યચ્ચ મહન્ મેષયુદ્ધમ્ ।
અનવરતયુદ્ધશક્તિસમ્પન્નયોશ્ચ તયોશ્
શ‍ૃઙ્ગપઞ્જરાન્તરૌદ્ભૂતસૃગ્ બહુ ભૂમૌ
નિપતિતં દૃષ્ટ્વા
આશાપ્રતિબદ્ધચિત્તઃ પિશિતલોભતયા ગોમાયુસ્-

તજ્જિઘૃક્ષુસ્-

સમ્પીડિતૌદ્ઘાતાત્ સદ્યઃ પઞ્ચત્વં અગમત્ ।

અથ પરિવ્રાડ્ વિસ્મયાવિષ્ટો અબ્રવીત્ ।

જમ્બુકો હુડુયુદ્ધેનૈતિ ।

કૃતશૌચશ્ચાગતસ્તં ઉદ્દેશં આષાઢભૂમિં

અપિ

ગૃહીતાર્થમાત્રાસારં અપક્રાન્તં નાપશ્યદ્-

દેવશર્મા ।

કેવલં ત્વ્

અપવિદ્ધત્રિદણ્ડકાષ્ઠકુણ્ડિકાપરિસ્રાવણકૂર્-

ચકાદ્ય્

અપશ્યત્ ! અચિન્તયચ્ચ ।

ક્વાસાવાષાઢભૂતિઃ ।

નૂનં અહં તેન મુષિતઃ ।

ઇત્યુક્તવાન્ ।

વયં ચાષાઢભૂતિનૈતિ ।

અથાસૌ કપાલશકલગ્રન્થિકાવશેષઃ કઞ્ચિદ્-

ગ્રામં અસ્તં

ગચ્છતિ રવૌ પ્રવિષ્ટઃ ।

પ્રવિશન્નેકાન્તવાસિનં તન્ત્રવાયં અપશ્યત્ !

આવાસકં ચ

પ્રાર્થિતવાન્ ।

તેનાપિ તસ્યાત્મીયગૃહએકદેશે સ્થાનં નિર્દિશ્ય

ભાર્યા

અભિહિતા ।

યાવદહં નગરં ગત્વા સુહૃત્સમેતો મધુપાનં

કૃત્વા

આગચ્છામિ ! તાવદપ્રમત્તયા ગૃહે ત્વયા ભાવ્યમ્ ।

ઇત્યાદિશ્ય ગતઃ ।

અથ તસ્ય ભાર્યા પુંશ્ચલી દૂતિકાસઞ્ચોદિતા

શરીરસંસ્કારં કૃત્વા

પરિચિતસકાશં ગન્તું આરબ્ધા ।

અભિમુખશ્ચાસ્યા ભર્તા
મદવિલોપાસમાપ્તાક્ષરવચનઃ
પરિસ્ખલિતગતિર્ અવસ્રસ્તવાસાસ્સમાયાતઃ ।
તં ચ દૃષ્ટ્વા પ્રત્યુત્પન્નમતિઃ કૌશલાદાકલ્પં
અપનીય
પૂર્વપ્રકૃતં એવ વેષં આસ્થાય
પાદશૌચશયનાદ્યારમ્ભં
અકરોત્ ।
કૌલિકસ્તુ ગૃહં પ્રવિશ્ય નિદ્રાવશં અગમત્ ।
સુપ્તપ્રતિબુદ્ધશ્ચાસૌ તાં આક્રોષ્ટું આરબ્ધઃ ।
પુંશ્ચલિ ! ત્વદ્ગતં અપચારં સુહૃદો મે વર્ણયન્તિ
।
ભવતુ ।
પુષ્ટં નિગ્રહં કરિષ્યામીતિ ।
અસાવપિ નિર્મર્યાદા પ્રતિવચનં દાતું આરબ્ધા ।
પુનર્ અપિ ચાસૌ પ્રતિબુદ્ધસ્તાં
મધ્યસ્તૂણાયાં રજ્જ્વા
સુપ્રતિબદ્ધાં કૃત્વા પ્રસુપ્તઃ ।
દૂતિકાએતાં પુનર્ ગમનાય પ્રચોદિતવતી ।
સા તૂત્પન્નપ્રતિભા દૂતિકાં
આત્મીયદર્શનસંવિધાનેન
બદ્ધ્વા કામુકસકાશં યયૌ ।
અસાવપિ પ્રતિબુદ્ધસ્તથાએવ તાં આક્રોષ્ટું
આરબ્ધઃ ।
દૂતિકા તુ
શઙ્કિતહૃદયાનુચિતવાક્યૌદાહરણભીતા ન
કિઞ્ચિદ્-
ઉક્તવતી ।
તન્ત્રવાયસ્તુ શાઠ્યાદિયં ન કિઞ્ચિન્
મમૌત્તરં પ્રયચ્છતિ
ઇત્યુત્થાય તસ્યાસ્તીક્ષ્ણશસ્ત્રેણ નાસિકાં
છિત્ત્વાબ્રવીત્ ।

તિષ્ઠએવંલક્ષણા ।
કસ્ત્વાં અધુના વાર્ત્તાં પૃચ્છતિ ।
ઇત્યુક્ત્વા નિદ્રાવશં ઉપાગમત્ ।
આગતા ચ સા તન્ત્રવાયી દૂતિકાં અપૃચ્છત્ ।
કા તે વાર્ત્તા ।
કિં અયં પ્રતિબુદ્ધો અભિહિતવાન્ ।
કથય કથયૈતિ ।
દૂતિકા તુ કૃતનિગ્રહા નાસિકાં દર્શયન્તી
સામર્ષં આહ ।
શિવાસ્તે સર્વા વાર્ત્તાઃ ।
મુઞ્ચ ।
ગચ્છામીતિ ।
તથા ત્વનુષ્ઠિતે નાસિકાં આદાયાપક્રાન્તા ।
તન્ત્રવાય્ય્- અપ્યકૃતકબદ્ધં આત્માનં
તથાએવાકરોત્ ।
કૌલિકસ્તુ યથાપૂર્વં એવ પ્રતિબુદ્ધસ્તાં આક્રોશત્
।
અસાવપિ દુષ્ટા બહુ ધૃષ્ટરં આહ ।
ધિગ્ઘતો અસિ ।
કો માં નિરાગસં વિરૂપયિતું સમર્થઃ ।
શ◌ૃણ્વન્તુ મે લોકપાલાઃ ।
યથાહં કૌમારં ભર્તારં મુક્ત્વા નાન્યં
પરપુરુષં
મનસાપિ વેદ્મિ ! તથા મમાનેન સત્યેનાવ્યઙ્ગ્યં
મુખં અસ્ત્વ્
ઇતિ ।
અથાસૌ મૂર્ખઃ કૃતકવચનવ્યામોહિતચિત્તઃ
પ્રજ્વાલ્યૌલ્કાં
અવ્યઙ્ગમુખીં જાયાં દૃષ્ટ્વા પ્રોત્ફુલ્લનયનઃ
પરિચુમ્બ્ય
હૃષ્ટમના બન્ધવાદવમુચ્ય પીડિતં ચ
પરિષ્વજ્ય શય્યાં

આરોપિતવાન્ ।
પરિવ્રાજકસ્ત્વાદિત એવારભ્ય યથાવૃત્તં
અર્થં અભિજ્ઞાતવાન્ ।
દૂતિકાપિ હસ્તકૃતનાસાપુટા સ્વગૃહં
ગત્વાચિન્તયત્ ।
કિં અધુના કર્તવ્યં ઇતિ ।
અથ તસ્યા ભર્તા નાપિતો રાજકુલાત્ પ્રત્યૂષસ્ય્
આગત્ય તાં ભાર્યાં આહ
।
સમર્પય ! ભદ્રે ! ક્ષુરભાણ્ડમ્ ।
રાજકુલે કર્મ કર્તવ્યં ઇતિ ।
સા ચ દુષ્ટાભ્યન્તરસ્થાએવ ક્ષુરં એવ પ્રાહિણોત્ ।
સ ચ સમસ્તક્ષુરભાણ્ડાસમર્પણાત્
ક્રોધાવિષ્ટચિત્તો
નાપિતસ્તં એવ તસ્યાઃ ક્ષુરં પ્રતીપં પ્રાહિણોત્
।
અથાસાવાર્તરવં ઉચ્ચૈઃ કૃત્વા પાણિના
નાસાપુટં પ્રમૃજ્ય
અસૃક્પાતસમેતાં નાસિકાં ક્ષિતૌ
પ્રક્ષિપ્યાબ્રવીત્ ।
પરિત્રાયધ્વં ! પરિત્રાયધ્વમ્ ।
અનેનાહં અદૃષ્ટદોષા વિરૂપિતેતિ ।
તથાભ્યાગતૈ રાજપુરુષૈઃ
પ્રત્યક્ષદર્શનાં તાં દૃષ્ટ્વા
વિરૂપાં કીલપાર્ષ્ણિલગુડૈર્ અતીવ હતં
પશ્ચાદ્બાહુબન્ધશ્
ચ તયા સહ ધર્મસ્થાનં ઉપનીતો નાપિતઃ ।
પૃચ્છ્યમાનશ્ચાધિકૃતૈઃ કિં ઇદં મહદ્-
વિશસનં સ્વદારેષુ
ત્વયા કૃતં ઇતિ યદા બહુશ ઉચ્યમાનો નૌત્તરં
પ્રયચ્છતિ ! તદા
ધર્માધિકૃતાશ્શૂલે અવતંસ્યતાં ઇત્ય્

આજ્ઞાપિતવન્તઃ ।
નિષ્પાપં ચ પરિવ્રાટ્ ચ્છૂલસ્થાનં નીયમાનં
નાપિતં દૃષ્ટ્વા
સત્ત્વાનુકમ્પયા ચૌપલબ્ધતત્ત્વાર્થો અધિકરણં
ઉપગમ્ય
ધર્મસ્થાનાધિકૃતાન્ અબ્રવીત્ ।
નાર્હથએનં અદોષકર્તારં નાપિતં શૂલે
સમારોપયિતુમ્ ।
યત્કારણં ! ઇદં આશ્ચર્યત્રયં શ્રૂયતામ્ ।
જમ્બુકો હુડુયુદ્ધેન વયં ચાષાઢભૂતિના ।
દૂતિકા તન્ત્રવાયેન ત્રયો અનર્થાસ્સ્વયં કૃતઃ ॥ ૫૫ ॥

સમુપલબ્ધતત્ત્વાર્થૈશ્ચાધિકૃતૈઃ પરિત્રાયિતો
નાપિત ઇતિ ।

Eન્ચોદેદ્ પ્રૂફ઼્ૃેઅદ્ બ્ય્ ળર્સ્ ંઅર્તિન્ Fઓસ્સે લ્ફ઼્ોસ્સે અત્ ઓન્લિનેંઓ

---

*tantrAkhyAyikA*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*